ततो रुद्रः समभवद्वैश्वानर इव ज्वलन् ॥
द्वितीयादपतन्नेत्रादश्रुबिन्दुस्तु वामकात् ।
तस्मादजतमुत्पन्नमुक्तकर्म्मसु योजयेत् ॥
कृत्रिमञ्च भवेत्तद्धि रङ्गादिरसयोगतः ।
रूप्यन्तु रजतं तारं चन्द्रकान्ति सितं शुभम् ॥
गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षमम् ।
स्वर्णाद्यं चन्द्रवत् स्वच्छं रूप्यं नवगुणं शुभम् ॥
कठिनं कृत्रिमं रूक्षं रक्तं पीतं दलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥
रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरात् ध्रुवम् ।

तारं शरीरस्य करोति तापं
विध्वंसनं यच्छति शुक्रनाशम् ।
वीर्य्यं बलं हन्ति तनोश्च पुष्टिं
महागदान् पोषयति ह्यशुद्धम् ॥"

अथ मारणाय योग्यं रूप्यमाह ।
"गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षमम् ।
वर्णाढ्यं चन्द्रवत् स्वच्छं तारं नवगुणं स्मृतम् ॥"
अयोग्यम् ।
"कठिनं कृत्रिमं रूक्षं रक्तं पीतं दलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥"
अथ शोधनविधिः ।
"पत्तलीकृतपत्राणि तारस्याग्नौ प्रतापयेत् ।
निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं रजतपत्राणां विशुद्धिः संप्रजायते ॥"
अथाशुद्धस्य रूप्यस्य दोषमाह ।

"रूप्यं ह्यशुद्धन्तु करोति तापं
विध्वंसनं वीर्य्यबलक्षयञ्च ।
देहस्य पुष्टिं हरते तनोति
रोगांस्ततः शोधनमस्य कुर्य्यात् ॥"

अथ रूप्यस्य मारणविधिः ।
"भागैकं तालकं मर्द्यं याममम्लेन केनचित् ।
तेन भागत्रयं तारपत्राणि परिलेपयेत् ॥
धृत्वा मूषापुटे रुद्ध्वा पुटेत् त्रिंशद्वनोपलैः ।
समुद्धृत्य पुनस्तालं दत्त्वा रुद्ध्वा पुनः पचेत् ।
एवं चतुर्द्दशपुटैस्तारं भस्म प्रजायते ॥"
अन्यप्रकारः ।
"स्नुहीक्षीरेण संपिष्टं माक्षिकं तेन लेप-
येत् ।
तालकस्य प्रकारेण तारपत्राणि बुद्धिमान् ।
पुटे चतुर्द्दशपुटैस्तारं भस्म प्रजायते ॥"
एवं मारितस्य रूप्यस्य गुणाः ।
"रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरात् ध्रुवम् ॥"
इति भावप्रकाशः ॥
अथ रूप्यकरणम् ।
"मध्वाज्यं गुडताम्रञ्च करेणा माक्षिकं रसम् ।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं शृणु ॥"
इति गारुडे १९८ अध्यायः ॥

रूप्यं, त्रि, ( प्रशस्तं रूपं अस्यास्तीति । रूप +
"रूपादाहतप्रशंसयोर्यप् ।" ५ । २ । १२० ।
इति यप् ।) सुन्दरम् । इति मेदिनी । ये, ५० ॥
(क्ली, उपमेयम् । यथा, साहित्यदर्पणे १० परि-
च्छेदे समासोक्त्यलङ्कारे ।
"अत्र हि तिमिरांशुकयोरूप्यरूपकभावो द्वयो-
रावरकत्वेन स्फुटमिति ॥" ॥ पुं, प्रत्ययविशेषः ।
स च तत आगत इत्येतस्मिन्विषये "हेतुमनुष्ये-
भ्योऽन्यतरस्यां रूप्यः ।" ४ । ३ । ८१ । इति
सूत्रेण हेतुभ्यो मनुष्येभ्यश्चान्यतरस्यां भवति ॥
यथा समादागतं समरूप्यम् । देवदत्तरूप्यम् ॥)

रूप्याध्यक्षः, पुं, ( रूप्यस्य रूप्ये वा अध्यक्षः । )
नैष्किकः । इत्यमरः ॥ रूप्यं रजतं तदेव निष्कं
पूर्व्ववत् ष्णिकः रजताध्यक्षो नैष्किकः । टङ्कक-
पतिर्नैष्किक इत्यन्ये । पुरुषाकृत्यादिरूपं गठितं
रजतं रूप्यं तस्याध्यक्षो नैष्किक इति केचित् ।
इति भरतः ॥

रूबुकः, पुं, एरण्डः । इति शब्दमाला ॥ ( यथास्य
पर्य्यायः ।
"शुक्लएरण्ड आमण्डचित्रो गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः ॥
वातारिस्तरुणश्चापि रुबुकश्च निगद्यते ।
रक्तोऽपरो रुबुकः स्यादुरुबुको रुबुस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चुत्तानपादकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

रूष, त् क विस्फुरणे । इति कविकल्पद्रुमः ॥
( अदन्तचुरा०-पर०-अक०-सेट् । ) दीर्घी ।
मर्द्धन्योपधः । अरुरूषत् । इति दुर्गादासः ॥

रूषकः, पुं, ( रूषयतीति । रूष + ण्वुल् । )
वासकः । इति जटाधरः ॥

रूषितं, त्रि, (रूष + क्तः ।) गुण्ठितम् । इत्यमरः ॥
हे धूलिगुण्ठकेनैव रूषिते । गुड़ि क वेष्टे रूष
त् क स्याद्विस्फुरणे क्तः । इति भरतः ॥ ( यथा,
रामायणे । २ । ४२ । १५ ।
"यः सुखेनोपधानेषु शेते चन्दनरूषितः ।
वीज्यमानो महार्हाभिः स्त्रीभिर्मम सुतोत्तमः ॥")

रे, व्य, सम्बोधनविशेषः । यथा,—
"सम्बोधनेऽङ्ग भोः पाट् प्याट् हे है हं होऽरे
रेऽपि च ।"
इति हेमचन्द्रः । ६ । १७१ ॥
( यथा, कथासरित्सागरे । ३२ । १५५ ।
"तत्र मन्दमिवाणोक्य साभिप्रायः समां नृपः ।
पप्रच्छ रे किमीदृक् त्वं सञ्जातः कथ्यता-
मिति ॥" )

रेक, ऋ ङ शङ्कायाम् । इति कविकल्पद्रुमः ।
( भ्वा०-आत्म०-सक०-सेट् । ) शङ्का संशया-
रोपः । ऋ, अरिरेकत् । ङ, रेकते पुरुषत्वं
स्थाणौ । स्थाणुर्वा पुरुषो वेति संशयमारो-
पयतीत्यर्थः । रिरेके । इति दुर्गादासः ॥

रेकः, पुं, ( रेक शङ्कायाम् अथवा रिच् + घञ् । )
शङ्का । नीचः । विरेचनम् । इति मेदिनी ।
के, ३१ ॥ (यथा,—
"वस्तिर्वातविकारान् पैत्तान् रेकः कफोद्भवान्
वमनम् ।
क्षौद्रं जयति बलासं सर्पिः पित्तं समीरणं
तैलम् ॥"
इति वाभटे उत्तरस्थाने ४० अध्याये ॥)
भेकः । इति त्रिकाण्डशेषः ॥

रेक्णः, [स्] क्ली, (रिणक्तीति । रिच् + "रिचेर्धने
घित् किच्च ।" उणा० ४ । १९८ । इति असुन् ।
चात् प्रत्ययस्य नुट् । घित्वात् कुत्वम् ।) स्वर्णम् ।
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रेका, स्त्री, ( रेक शङ्कायाम् + अच् । स्त्रियां
टाप् । ) सन्देहः । इति हेमचन्द्रः ॥

रेखा, स्त्री, ( लिख्यते इति । लिख विलेखने +
"षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति
भिदादित्वात् अङ् । टाप् । रलयोरैक्यात् लस्य
रत्वम् । ) अल्पकम् । छद्म । आभोगः ।
उल्लेखः । इति विश्वः ॥ उल्लेखश्च दण्डाकार-
लिपिविशेषः । दाँड़ी इति कषी इति च भाषा ।
यथा,—
"यावती यावती रेखा यवानामङ्कवर्गके ।
तावतीं द्विगुणीकृत्य अष्टाभिः परिशोधयेत् ॥
अष्टोपरि भवेद्रेखा अष्टाभ्यन्तरबिन्दवः ।
यत्र रेखा न बिन्दुश्च तत् समं परिकीर्त्तितम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
शरीरस्थरेखया शुभाशुभलक्षणं यथा,—
"ललाटे यस्य दृश्यन्ते तिस्रो रेखाः समाहिताः ।
सुखी पुत्त्रसमायुक्तः स षष्टिं जीवते नरः ॥
चत्वारिंशच्च वर्षाणि द्विरेखादर्शनान्नरः ।
विंशत्यब्दमेकरेख आकर्णान्ताः शतायुषः ॥
आकर्णान्तरिता रेखास्तिस्रश्च स्युः शतायुषः ।
सप्तत्या षड्भिं रेखा तु षष्ट्यायुस्तिसृभिर्भवेत् ॥
व्यक्ताव्यक्ताभी रेखाभिर्विंशत्यब्दायुरेव हि ।
चत्वारिंशच्च वर्षाणि हीनरेखस्तु जीवति ॥
भिन्नाभिन्नैव रेखाभिरपमृत्युर्नरस्य हि ।
त्रिशूलं पट्टिशं वापि ललाटे यस्य दृश्यते ।
धनपुत्त्रसमायुक्तः स जीवेत् शरदः शतम् ॥
तर्ज्जन्या मध्यमाङ्गुल्या आयूरेखा तु मध्यतः ।
सम्प्राप्ता या भवेद्यस्य स जीवेत् शरदः शतम् ॥
कुलरेखा तु प्रथमा अङ्गुष्ठादनुवर्त्तते ।
मध्यमायाः करे रेखा आयूरेखा अतः परम् ॥
कनिष्ठिकां समाश्रित्य आयूरेखां समादिशेत् ।
अच्छिन्ना चाविभक्ता या स जीवेच्छरदः शतम् ॥
यस्य पाणितले रेखा आयुस्तस्य प्रकाशयेत् ।
शतं वर्षाणि जीवेच्च भोगी रुद्र ! न संशयः ॥
कनिष्ठिकां समाश्रित्य मध्यमायासमागता ।
षष्टिं वर्षाणि कुर्य्यात् आयूरेखा तु मानवम् ॥"
इति गारुडे ६३ अध्यायः ॥ * ॥
अपिच ।
"घनाङ्गुलिश्च सधनस्तिस्रो रेखाश्च यस्य वै ।
नृपतेः करतलगा मणिबन्धे समुत्थिता ॥
युग्ममीनाङ्कितकरो भवेत् सत्रप्रदो नरः ।
वज्राकारश्च धनिनां मत्स्यपुच्छनिभो बुधे ॥